वेदोक्त पार्थिव-पूजनविधिः

लेखक

याज्ञिकसम्राट् पण्डित वेणीराम शर्मा गौड

अवकाशप्राप्त—वेदविभागाध्यक्ष, गोयनका संस्कृत कालेज, वाराणसी



चौखम्भा ओरियन्टालिया

वाराणसी दिल्ली

॥ श्रीः ॥

चौखम्भा राजसेवा ग्रन्थमाला


४६

वेदोक्त पार्थिव-पूजनविधिः


लेखक

याज्ञिकसम्राट् पण्डित वेणीराम शर्मा गौड

अवकाशप्राप्त—वेदविभागाध्यक्ष, गोयनका संस्कृत कालेज, वाराणसी








चौखम्भा ओरियन्टालिया

वाराणसी दिल्ली

प्रकाशक
चौखम्भा ओरियन्टालिया
पो० आ० चौखम्भा, पो० बाक्स नं० ३२
गोकुल भवन, के० ३७/१०९, गोपाल मन्दिर लेन
वाराणसी-२२१००१ (भारत)
फोन { ६३३५४ निवास
६५८८९ आफिस
टेलीग्राम : गोकुलोत्सव

शाखा—बंगलो रोड, ९ यू० बी० जवाहर नगर
दिल्ली-११०००७ फोन : २२१६१७



प्रथम संस्करण १९८१
मूल्य रु० ३-००

मुद्रक—श्रीगोकुल मुद्रणालय, गोपाल मन्दिर लेन, वाराणसी



पं० वेणीराम शर्मा गौड

प्राक्कथन

वैदिक वाङ्मयसे लेकर पुराणों तथा तान्त्रिक ग्रन्थों में पार्थिव-लिङ्गकी पूजा का विशेष उल्लेख मिलता है। अतः पार्थिव-लिङ्गकी पूजा अत्यन्त प्राचीन कालसे ही प्रचलित है। इसीलिये हिन्दू-जाति नित्य, नैमित्तिक और काम्य-रूपसे प्रतिदिन पार्थिव-लिङ्गकी पूजा करती है।

कलियुगमें पार्थिव-लिङ्गकी पूजा का विशेष महत्त्व कहा गया है—'पार्थिवं तु कलौ युगे।'

जो मनुष्य प्रतिदिन पार्थिव-लिङ्गकी श्रद्धा-भक्तिपूर्वक पूजा करते हैं, वे आयुष्मान्, बलवान्, धनवान्, पुत्रवान् और श्रीमान् हो जाते हैं। पार्थिव-लिङ्गके पूजनके महत्त्वके सम्बन्धमें 'नन्दिपुराण' में कहा गया है—

वरमिष्टं लभेल्लिङ्गं पार्थिवं यः समर्चयेत्।
तस्मात्तु पार्थिवं लिङ्गं ज्ञेयं सर्वार्थसाधकम्॥

अतः प्रत्येक मनुष्यको आत्मकल्याणार्थ प्रतिदिन पार्थिव-लिङ्गका पूजन करना चाहिये।

जिस प्रकार पुरुषोंको पार्थिव-लिङ्गके पूजनका अधिकार है, उसी प्रकार स्त्रियोंको भी पार्थिव-लिङ्गके पूजन करनेका अधिकार है—

स्त्रीणां सुपार्थिवं लिङ्गं सभर्तृणां विशेषतः।
विधवानां निवृत्तानां रसलिङ्गं विशिष्यते ॥
विधवानां प्रवृत्तानां स्फाटिकं परिकीर्तितम्। (शिवपुराण)

'स्त्रियोंको, विशेषकर सौभाग्यवती स्त्रियोंको पार्थिव-लिङ्ग (मिट्टीके बने हुए शिवलिङ्ग) की पूजा करनेका विधान है। वैराग्ययुक्त विधवा स्त्रियोंके लिये पारदके शिवलिङ्गके पूजन करनेका विशेष विधान है और माया-मोहसे निवृत्त विधवाओंको स्फटिकके शिवलिङ्गकी पूजा करनेके लिये कहा गया है।'

पार्थिव-लिङ्गकी संक्षिप्त पूजन-विधि इस प्रकार है—

पार्थिव-लिङ्गका पूजनकर्ता प्रातःकाल स्नान-सन्ध्योपासनादि नित्यकर्मसे निवृत्त होकर शुभासन पर उत्तराभिमुख होकर बैठे। पश्चात् पार्थिव-लिङ्गके निर्माणके लिये उत्तर दिशासे शमी वृक्षके गर्भकी अथवा पीपलके वृक्षके मूल (जड़) की लाई हुई मृत्तिकाको पूजाके स्थानमें रख दे और उसी जगह पूजन-सामग्रीको भी रख दे। अनन्तर वह पार्थिव-पूजन करनेके लिये अपने मस्तकमें त्रिपुण्ड्र भस्म लगावे और कण्ठमें रुद्राक्षकी माला धारण करे। पश्चात् आचमन, प्राणायाम करके पूजन-सामग्रीका सम्प्रोक्षण करे और रक्षा—दीपकको प्रज्वलित करे। अनन्तर आसनशुद्धि आदि कर अपने दाहिने हाथमें अक्षत, पुष्प आदि लेकर वेदोक्त और पुराणोक्त माङ्गलिक

मन्त्रोंको पढ़े। फिर पार्थिव-लिङ्गके पूजनार्थ सङ्कल्प करे। पश्चात् पार्थिव-लिङ्ग के लिये प्रधान-पीठका निर्माण कर उसका पूजन करे। प्रधान-पीठके पूजनार्थ पीठके मध्यमें अष्टदल कमल बनावे और उसके पूर्व दलसे प्रारम्भ कर ईशानपर्यन्त 'वामदेव' आदि आठ रुद्र देवताओं का स्थापन करे। पश्चात् मध्यमें 'ॐ नमो भगवते अनन्ताय शक्तियुताय योगपीठात्मने सदाशिवाय नमः' इससे पीठपूजा करे। अनन्तर 'ॐ ह्रौं जूँ सः हराय नमः' इससे मृत्तिका को ग्रहण करे। 'ॐ बं अमृताय नमः' इससे पवित्र जलका अभिमन्त्रण करे। 'ॐ ह्रौं जूँ सः महेश्वराय नमः' इस मन्त्रसे अँगूठेके पोरभर का लिङ्ग अपने दाहिने या बाएँ किसी एक ही हाथसे लिङ्ग बनावे। यदि असमर्थ व्यक्ति हो तो वह दोनों हाथोंसे लिङ्ग बना सकता है। जब लिङ्ग बन जाय तो उसके सिर पर नन्ही-सी मिट्टीकी गोली बनाकर रखे। इसको 'वज्र' कहते हैं। पश्चात् 'ॐ ह्रौं जूँ सः शूलपाणये नमः' इससे पीठपूजा के ऊपर लिङ्गको स्थापित करे। अनन्तर 'ध्यायेन्नित्यं महेशम्०' इस श्लोकको पढ़कर शिवजीका ध्यान करे और लिङ्गके मस्तक पर पुष्प चढ़ावे। पश्चात् करन्यास, हृदयादिन्यास करके लिङ्गकी प्राणप्रतिष्ठा करे, और 'ॐ पशुपतये नमः' इससे तीन बार शिवके मस्तक पर जल चढ़ावे। पश्चात् लिङ्गके मस्तकका वज्र फेंककर चावल चढ़ावे। अनन्तर राजोपचार अथवा षोडशोपचारसे लिङ्गकी पूजा करे। फिर आरती, मन्त्रपुष्पाञ्जलि, प्रदक्षिणा, प्रणाम और क्षमा-प्रार्थना करे। पश्चात् अपने दाहिने हाथका अंगूठा और तर्जनी मिलाकर उसके द्वारा 'बम् बम्' शब्द करते हुए अपना दाहिना गाल बजावे। इससे भगवान् शिवजी विशेष प्रसन्न होते हैं। फिर 'शिवमहिम्नस्तोत्र' आदि शिवसम्बन्धी स्तोत्रों का पाठ करे।

भारतवर्ष में पार्थिवेश्वरके पूजक अगणित संख्यामें हैं, किन्तु उन्हें शुद्ध और सविधि पार्थिव-पूजन करने की पद्धति उपलब्ध नहीं थी, जिससे उन्हें पार्थिवेश्वरके पूजन करने में विशेष कठिनाई होती थी। इस अभाव की पूर्ति के लिये मैंने 'वेदोक्त पार्थिव-पूजनविधि' का निर्माण किया है। आशा है, यह पुस्तिका पार्थिव-लिङ्गके पूजकोंके लिये अत्यन्त उपयुक्त होगी।

वेणीराम गौड वेदाचार्य
अवकाशप्राप्त—वेदविभागाध्यक्ष
गोयनका संस्कृत कालेज, वाराणसी

काशी
कार्तिक शुक्ल देवोत्थान एकादशी
संवत् २०३७

॥ श्रीहरिः ॥

पार्थिव-पूजनविधिः



वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥

पार्थिव–लिङ्ग का पूजनकर्ता प्रातःकाल स्नान-सन्ध्योपासनादि नित्यकर्म से निवृत्त होकर शुभासन पर उत्तराभिमुख होकर बैठे। पश्चात् पार्थिव–लिङ्ग के निर्माण के निमित्त उत्तर दिशा से शमी के वृक्ष के गर्भ की अथवा पीपल के वृक्ष के मूल (जड़) की लाई हुई मृत्तिका को पूजा के स्थान में रख दे और उसी जगह पूजन-सामग्री को भी रख दे। पश्चात् वह पार्थिव-पूजन करने के लिये अपने मस्तक में [1]त्रिपुण्ड्र भस्म लगावे और कण्ठ में रुद्राक्ष की माला धारण करे। अनन्तर '**ॐ केशवाय नमः। ॐ नारायणाय नमः। ॐ माधवाय नमः।**' इससे अथवा '**ॐ शिवाय नमः**' इससे तीन बार आचमन करे। पश्चात् निम्नलिखित मन्त्र से पवित्री धारण करे—

---

१. विना भस्मत्रिपुण्ड्रेन विना रुद्राक्षमालया। पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः ॥
तस्मान्मृदापि कर्तव्यं ललाटे वै त्रिपुण्ड्रकम् ॥ (लिङ्गपुराण)

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्व्वः प्रसव ऽउत्पुनाम्म्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥

पश्चात् तीन बार प्राणायाम करके इस प्रकार विनियोग करे—

ॐ अपवित्रः पवित्रो वेत्यस्य वामदेव ऋषिर्गायत्री छन्दो विष्णुर्देवता शरीरादिपवित्रकरणे विनियोगः ।

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

इस मन्त्र के द्वारा कुशोदक से अपना और पूजन-सामग्री का सम्प्रोक्षण करे और अक्षतपुञ्ज के ऊपर रक्षादीपक को प्रज्वलित कर रख दे। पश्चात् निम्नलिखित मन्त्र से अपने आसनको इस प्रकार पवित्र करे—

पृथ्वीति मन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसनपवित्रकरणे विनियोगः ।

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

पश्चात् अपने दाहिने हाथ में अक्षत, पुष्प आदि लेकर निम्नलिखित वेदोक्त और पुराणोक्त माङ्गलिक मन्त्रों को पढ़े—

ॐ आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो ऽअपरीतास ऽउद्भिदः ।

देवा नो यथा सदमिद्वृधे ऽअसन्नप्प्रायुवो रक्षितारो दिवेदिवे ॥ १ ॥
देवानां भद्रा सुमतिर्ऋजूयतां देवानाᳬं रातिरभि नो निवर्त्ततताम् ।
देवानाᳬं सख्यमुपसेदिमा व्वयं देवा न ऽआयुः प्रतिरन्तु जीवसे ॥ २ ॥
तान्पूर्व्वया निविदा हूमहे व्वयं भगं मित्रमदितिं दक्षमस्रिधम् ।
अर्य्यमणं व्वरुणᳬं सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥ ३ ॥
तन्नो व्वातो मयोभु व्वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।
तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥ ४ ॥
तमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे व्वयम् ।
पूषा नो यथा व्वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ५ ॥
स्वस्ति न ऽइन्द्रो व्वृद्धश्रवाः स्वस्ति नः पूषा व्विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ ६ ॥
पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो व्विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो व्विश्वे नो देवा ऽअवसा गमन्निह ॥ ७ ॥

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाᳬंसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ ८ ॥

शतमिन्नु शरदो ऽअन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मद्ध्या रीरिषतायुर्गन्तोः ॥ ९ ॥

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता स पिता स पुत्रः ।
विश्वे देवा ऽअदितिः पञ्चजना ऽअदितिर्ज्जातमदितिर्ज्जनित्वम् ॥ १० ॥

द्यौः शान्तिरन्तरिक्षᳬं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ।
वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वᳬं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ ११ ॥

यतो यतः समीहसे ततो नो ऽअभयं कुरु । शन्नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥१२॥

ॐ गणानां त्वा गणपतिᳬं हवामहे प्रियाणां त्वा प्रियपतिᳬं हवामहे निधीनां त्वा निधिपतिᳬं हवामहे वसो मम । आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥ १३ ॥

ॐ अम्बेऽअम्बिकेऽम्बालिके न मा नयति कश्चन। ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥ १४ ॥

ॐ लक्ष्मीनारायणाभ्यां नमः। ॐ उमामहेश्वराभ्यां नमः। ॐ वाणीहिरण्यगर्भाभ्यां नमः। ॐ शचीपुरन्दराभ्यां नमः। ॐ मातृपितृचरणकमलेभ्यो नमः। ॐ इष्टदेवताभ्यो नमः। ॐ कुलदेवताभ्यो नमः। ॐ ग्रामदेवताभ्यो नमः। ॐ स्थानदेवताभ्यो नमः। ॐ वास्तुदेवताभ्यो नमः। ॐ सर्वेभ्यो देवेभ्यो नमः। ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः। ॐ सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः।

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥ १ ॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ २ ॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥ ३ ॥
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ ४ ॥
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः। सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ ५ ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ ६ ॥

सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ॥ ७ ॥

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ ९ ॥
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ १० ॥
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥११॥
स्मृते सकलकल्याणभाजनं यत्र जायते । पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥ १२ ॥
सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः । देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥ १३ ॥
विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम् । वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ॥१४॥
वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ १५ ॥

इसके बाद अपने दाहिने हाथ में अर्घपात्र लेकर उसमें कुशत्रय, पुष्प, अक्षत, फल, जल, द्रव्य आदि रक्खे, पश्चात् इस प्रकार सङ्कल्प करे—

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्त्तमानस्य अद्य श्रीब्रह्म-

णोऽह्नि द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखण्डे भारतवर्षे कुमारिकाखण्डे आर्यावर्त्तैकदेशे अमुकक्षेत्रे विक्रमशके बौद्धावतारे अमुकनाम्नि संवत्सरे अमुकायने अमुकऋतौ महामाङ्गल्यप्रदमासोत्तमे मासे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते सूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथाराशिस्थानस्थितेषु सत्सु एवं ग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकशर्माऽहम् (अमुकवर्माऽहम् , अमुकगुप्तोऽहम्) मम सर्वारिष्टनिरसनपूर्वकसर्वपापक्षयार्थं दीर्घायुरारोग्य-धन-धान्य-पुत्र-पौत्रादिसमस्तसम्पत्प्रवृद्ध्यर्थं श्रुति-स्मृति-पुराणोक्तफलप्राप्त्यर्थं धर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्धिद्वारा श्रीसाम्बसदाशिवप्रीत्यर्थं पार्थिवलिङ्गपूजनं (अथवा—अमुकसंख्याकानां पार्थिवलिङ्गानां गणेश-गौरी-नन्दीश्वर-वीरभद्रादीनां च आवाहनं प्रतिष्ठापनं पूजनं च) करिष्ये ।

पश्चात् पार्थिवलिङ्ग के लिये प्रधान-पीठका निर्माण कर उसका पूजन करे। प्रधान-पीठ के पूजनार्थ पीठ के मध्य में अष्टदल बनावे और उसके पूर्व दलसे आरम्भ कर ईशानपर्यन्त निम्नलिखित देवताओं का इस प्रकार स्थापन करे—

ॐ वामदेवाय नमः ॥ १ ॥ ॐ ज्येष्ठाय नमः ॥ २ ॥ ॐ रौद्राय नमः ॥ ३ ॥ ॐ कालाय नमः ॥ ४ ॥ ॐ कलविकरणाय नमः ॥ ५ ॥ ॐ बलप्रमथनाय नमः ॥ ६ ॥ ॐ मनोन्मनाय नमः ॥ ७ ॥ ॐ सर्वभूतदमनाय नमः ॥ ८ ॥

पश्चात् मध्य में 'ॐ नमो भगवते अनन्ताय शक्तियुताय योगपीठात्मने सदाशिवाय नमः' इससे पीठपूजा करे। अनन्तर 'ॐ ह्रौं जूँ सः हराय नमः' इससे मृत्तिका को ग्रहण करे। 'ॐ वं अमृताय नमः' इससे पवित्र जलका अभिमन्त्रण करे। 'ॐ ह्रौं जूँ सः महेश्वराय नमः' इससे शिवकी मूर्तिको बनावे। 'ॐ ह्रौं जूँ सः शूलपाणये नमः' इससे पीठपूजा के ऊपर शिवकी मूर्ति को स्थापित करे। पश्चात् शिवजी का इस प्रकार ध्यान करे—

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारु चन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

पश्चात् 'ॐ 'पिनाकधृषे नमः' इससे साम्बसदाशिवका आवाहन करे। इसके बाद इस प्रकार विनियोग करे—

ॐ अस्य श्रीपार्थिवेश्वरचिन्तामणिविद्यामन्त्रस्य निग्रहानुग्रहकर्ता ब्रह्मा ऋषिः कामदुघा गायत्री छन्दः

शीघ्रफलप्रदस्वरूपी पार्थिवेश्वरो देवता ह्रौं बीजं ह्रीं शक्तिः नमः कीलकं मम सर्वाभीष्टकामनासिद्ध्यर्थं (मम अमुक यजमानस्य अमुककामनासिद्ध्यर्थं) पूजने विनियोगः ।

विनियोग के बाद क्रमशः करन्यास और हृदयादिन्यास करे ।

अथ करन्यासः

ॐ ह्रां अङ्गुष्ठाभ्यां नमः । ॐ ह्रीं तर्जनीभ्यां नमः । ॐ ह्रूं मध्यमाभ्यां नमः । ॐ ह्रैं अनामिकाभ्यां नमः । ॐ ह्रौं कनिष्ठिकाभ्यां नमः । ॐ ह्रः करतलकरपृष्ठाभ्यां नमः ।

अथ हृदयादिन्यासः

ॐ ह्रां हृदयाय नमः । ॐ ह्रीं शिरसे स्वाहा । ॐ ह्रूं शिखायै वषट् । ॐ ह्रैं कवचाय हुम् । ॐ ह्रौं नेत्रत्रयाय वौषट् । ॐ ह्रः अस्त्राय फट् ।

न्यास करने के बाद शिवजीका ध्यान करे—

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारु चन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

पश्चात् पार्थिव-लिङ्ग के ऊपर अपना दाहिना हाथ रखकर 'ॐ आं ह्रीं क्रों यं रं लम्०' इत्यादि के द्वारा प्राणप्रतिष्ठा करे।

अथ प्राणप्रतिष्ठा

अस्य प्राणप्रतिष्ठामन्त्रस्य ब्रह्म-विष्णु-रुद्रा ऋषयः ऋग्यजुःसामानि छन्दांसि क्रियामयवपुः प्राणाख्या देवता आं बीजं ह्रीं शक्तिः क्रौं कीलकं अस्मिन् पार्थिवलिङ्गे साम्बशिवस्य प्राणप्रतिष्ठापने विनियोगः।

ॐ ब्रह्मविष्णुरुद्र-ऋषिभ्यो नमः शिरसि। ॐ ऋग्यजुः सामच्छन्दोभ्यो नमः मुखे। ॐ प्राणाख्यदेवतायै नमः हृदये। ॐ आं बीजाय नमः गुह्ये (लिङ्गे)। ॐ ह्रीं शक्त्यै नमः पादयोः। ॐ क्रौं कीलकाय नमः सर्वाङ्गेषु।

अथ करन्यासः

ॐ अं कं खं गं घं ङं आं पृथिव्यप्तेजोवाय्वाकाशात्मने आं अङ्गुष्ठाभ्यां नमः।
ॐ इं चं छं जं झं ञं शब्दस्पर्शरूपरसगन्धात्मने ईं तर्जनीभ्यां नमः।
ॐ उं टं ठं डं ढं णं श्रोत्र-त्वक्-चक्षुर्जिह्वाघ्राणात्मने ऊं मध्यमाभ्यां नमः।
ॐ एं तं थं दं धं नं वाक्-पाणि-पादपायूपस्थात्मने ऐं अनामिकाभ्यां नमः।
ॐ ओं पं फं बं भं मं वचनादान—विहरणोत्सर्गानन्दात्मने औं कनिष्ठिकाभ्यां नमः।
ॐ अं यं रं लं वं शं षं सं हं ळं ठं क्षं मनोबुद्ध्यहङ्कारचित्तात्मने अः करतलकरपृष्ठाभ्यां नमः।

अथ हृदयादिन्यासः

ॐ अं कं खं गं घं ङं पृथिव्यप्तेजोवाय्वाकाशात्मने आं हृदयाय नमः ।
ॐ इं चं छं जं झं ञं शब्दस्पर्शरूपरसगन्धात्मने ईं शिरसे स्वाहा ।
ॐ उं टं ठं डं ढं णं श्रोत्र—त्वक्-चक्षुर्जिह्वा-घ्राणात्मने ऊं शिखायै वषट् ।
ॐ एं तं थं दं धं नं वाक्-पाणि-पाद-पायूपस्थात्मने ऐं कवचाय हुम् ।
ॐ ओं पं फं बं भं मं वचनादानविहरणोत्सर्गानन्दात्मने औं नेत्रत्रयाय वौषट् ।
ॐ अं यं रं लं वं शं षं सं हं ळं क्षं मनोबुद्ध्यहङ्कारचित्तात्मने अः अस्त्राय फट् ।
एवमात्मनि मूर्तौ (देवे) च न्यासं कुर्यात् ।

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं ळं क्षं हं सः सोऽहं अस्य शिवस्य प्राणाः इह प्राणाः ।
ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं ळं क्षं हं सः सोऽहं अस्य शिवस्य जीव इह स्थितः ।
ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं ळं क्षं हं सः सोऽहं अस्य शिवस्य सर्वेन्द्रियाणि वाङ्-मन-स्त्वक्-चक्षुः-श्रोत्र-जिह्वा-घ्राण-पाणि-पाद-पायूपस्थानि इहैवागत्य सुखं सुस्थिरं सुचिरं तिष्ठन्तु स्वाहा ।

ॐ अ॒यं पु॒रो भु॒वस्तस्य॑ प्रा॒णो भौ॑वाय॒नो व्व॑स॒न्तः प्रा॑णाय॒नो गा॑य॒त्री व्वा॑स॒न्ती गा॑य॒त्र्यै गा॑य॒त्रं गा॑य॒त्रादु॑पा॒ᳪ शुरु॑पा॒ᳪशोस्त्रि॒वृत्त्रि॒वृतो॑ रथन्त॒रं व्वसि॑ष्ठ॒ ऽऋषि॑ः प्र॒जाप॑तिगृहीतया॒ त्वया॑ प्रा॒णं गृ॑ह्णामि प्र॒जाभ्य॑ः ॥ १ ॥

अयं दक्षिणा व्विश्वकर्म्मा तस्य मनो व्वैश्वकर्म्मणं ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मी त्रिष्टुभः स्वारꣳ स्वारादन्तर्य्यामोऽन्तर्य्यामात्पञ्चदशः पञ्चदशाद् बृहद् भरद्वाज ऽऋषिः प्प्रजापतिगृहीतया त्वया मनो गृह्णामि प्प्रजाभ्यः ॥ २ ॥

अयं पश्चाद् व्विश्वव्यचास्तस्य चक्षुर्व्वैश्वव्यचसं व्वर्षाश्चाक्षुष्यो जगती व्वार्षी जगत्या ऽऋक्सममृक् समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपं जमदग्निर्ऋषिः प्प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्प्रजाभ्यः ॥ ३ ॥

इदमुत्तरात् स्वस्तस्य श्श्रोत्रꣳ सौवꣳ शरच्छ्रौत्र्यनुष्टुप् शारद्यनुष्टुभ ऽऐडमैडान्मन्थी मन्थिन ऽएकविꣳश ऽएकविꣳशाद् वैराजं व्विश्वामित्र ऽऋषिः प्प्रजापतिगृहीतया त्वया श्श्रोत्रं गृह्णामि प्प्रजाभ्यः ॥ ४ ॥

इयमुपरि मतिस्तस्यै वाङ्मात्या हैमन्तो व्वाच्यः पङ्क्तिर्हैमन्ती पङ्क्त्यै निधनवन्निधनवत ऽआग्ग्रयण ऽआग्ग्रयणात् त्रिणवत्रयस्त्रिꣳशौ त्रिणवत्रयस्त्रिꣳशाभ्याꣳ शाक्वररैवते व्विश्वकर्म्म ऽऋषिः प्प्रजापतिगृहीतया त्वया व्वाचं गृह्णामि प्प्रजाभ्यः ॥ ५ ॥

ॐ शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि। राजा मे प्राणो ऽअमृतꣳ सम्राट् चक्षुर्विराट् श्श्रोत्रम् ॥ ६ ॥

ॐ पुनर्म्मनः पुनरायुर्म्म ऽआगन्पुनः प्राणः पुनरात्मा म ऽआगन्पुनश्चक्षुः पुनः श्श्रोत्रम्म ऽआगन्। वैश्वानरो ऽअदब्धस्तनूपा ऽअग्निर्नः पातु दुरितादवद्यात् ॥ ७ ॥

ॐ अपां पेरुरस्यापो देवीः स्वदन्तु स्वात्तं चित्सद्देव हविः। सन्ते प्राणो व्वातेन गच्छताꣳ समङ्गानि यजत्रैः सं यज्ञपतिराशिषा ॥ ८ ॥

ॐ मनो जूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञमिमं तनो त्वरिष्टं यज्ञꣳ समिमं दधातु। व्विश्वे देवास ऽइह मादयन्तामोँ३॥ प्रतिष्ठ ॥ ९ ॥

ॐ एष वै प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितं भवति ॥

ॐ अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन ॥

इस प्रकार पार्थिव-लिङ्ग की प्राणप्रतिष्ठा कर उनका ध्यान करे।

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारु चन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

गणपति-पूजन

ॐ गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनां त्वा निधिपतिꣳ हवामहे वसो मम । आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥

इति षोडशोपचारैः पञ्चोपचारैर्वा गणपतिं पूजयेत् ।

नन्दीश्वर-पूजन

ॐ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
सङ्क्रन्दनोऽनिमिष एकवीरः शतꣳ सेना अजयत्साकमिन्द्रः ॥

वीरभद्र-पूजन

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाᳪं सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥

इति षोडशोपचारैः पञ्चोपचारैर्वा वीरभद्रं पूजयेत् ।

स्वामिकार्तिक-पूजन

ॐ यदक्रन्दः प्रथमं जायमान ऽउद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू ऽउपस्तुत्यं महि जातं ते ऽअर्वन् ॥

इति षोडशोपचारैः पञ्चोपचारैर्वा स्वामिकार्तिकं पूजयेत् ।

कुबेर-पूजन

ॐ कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नम ऽउक्तिं यजन्ति ॥

इति षोडशोपचारैः पञ्चोपचारैर्वा कुबेरं पूजयेत् ।

कीर्तिमुख-पूजन

ॐ असवे स्वाहा व्वसवे स्वाहा व्विभुवे स्वाहा व्विवस्वते स्वाहा गणश्रिये स्वाहा गणपतये स्वाहाभिभुवे स्वाहाधिपतये स्वाहा शूषाय स्वाहा सꣳसर्प्पाय स्वाहा चन्द्राय स्वाहा ज्ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवा पतये स्वाहा ॥

इति षोडशोपचारैः पञ्चोपचारैर्वा कीर्तिमुखं पूजयेत् । ततः पार्थिवेश्वरस्य राजोपचारैः षोडशोपचारैर्वा पूजनं कुर्यात् । तद्यथा—

आवाहन—ॐ नमस्ते रुद्र मन्यव ऽउतो त ऽइषवे नमः ।
बाहुब्भ्यामुत ते नमः ॥

श्रीभगवते साम्बसदाशिवाय नमः आवाहनं समर्पयामि । आवाहनार्थे पुष्पं समर्पयामि ।

आसन—ॐ या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ॥

श्रीभगवते साम्बसदाशिवाय नमः आसनं समर्पयामि । आसनार्थे अक्षतान् समर्पयामि ।

पाद्य—ॐ यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत् ॥

श्रीभगवते साम्बसदाशिवाय नमः पाद्यं समर्पयामि ।

अर्घ्य—ॐ शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।
यथा नः सर्व्वमिज्जगदयक्ष्मᳪ सुमना ऽअसत् ॥

श्रीभगवते साम्बसदाशिवाय नमः अर्घ्यं समर्पयामि ।

आचमन—ॐ अद्ध्यवोचदधिवक्ता प्प्रथमो दैव्व्यो भिषक् ।
अहींश्च सर्व्वाञ्जम्भयन्त्सर्व्वाश्च यातु धान्न्यो धराचीः परासुव ॥

श्रीभगवते साम्बसदाशिवाय नमः आचमनीयं जलं समर्पयामि ।

मधुपर्क—ॐ यन्मधुनो मधव्व्यं परमᳪ रूपमन्नाद्यम् ।
तेनाहं मधुनो मधव्व्येन परमेण रूपेणान्नाद्येन परमो मधव्व्योऽन्नादोऽसानि ॥

श्रीभगवते साम्बसदाशिवाय नमः मधुपर्कं समर्पयामि ।

स्नान—ॐ असौ यस्ताम्म्रो ऽअरुण ऽउत बब्भ्रुः सुमङ्गलः ।
ये चैनᳪ रुद्रा ऽअभितो दिक्षुश्श्रिताः सहस्स्रशोऽवैषाᳬ हेड ऽईमहे ॥

श्रीभगवते साम्बसदाशिवाय नमः स्नानीयं जलं समर्पयामि ।

पयःस्नान—ॐ पयः पृथिव्यां पय ऽओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् ॥

श्रीभगवते साम्बसदाशिवाय नमः पयःस्नानं समर्पयामि । पयःस्नानान्ते शुद्धोदकस्नानं समर्पयामि

दधिस्नान—ॐ दधिक्राव्णो ऽअकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र ण ऽआयूंषि तारिषत् ॥

श्रीभगवते साम्बसदाशिवाय नमः दधिस्नानं समर्पयामि । दधिस्नानान्ते शुद्धोदकस्नानं समर्पयामि ।

घृतस्नान—ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमा वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥

श्रीभगवते साम्बसदाशिवाय नमः घृतस्नानं समर्पयामि । घृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि ।

मधुस्नान—ॐ मधु वाता ऽऋतायते मधु क्षरन्ति सिन्धवः । माद्ध्वीर्नः सन्त्वोषधीः ॥
मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्म्मधुमाँ२ ऽअस्तु सूर्य्यः । माद्ध्वीर्ग्गावो भवन्तु नः ॥

श्रीभगवते साम्बसदाशिवाय नमः मधुस्नानं समर्पयामि । मधुस्नानान्ते शुद्धोदकस्नानं समर्पयामि ।

शर्करास्नान—ॐ अपाᳪं रसमुद्वयसᳪं सूर्ये सन्तᳪं समाहितम् ।
अपाᳪं रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥

श्रीभगवते साम्बसदाशिवाय नमः शर्करास्नानं समर्पयामि । शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि ।

पञ्चामृतस्नान—ॐ पञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥

श्रीभगवते साम्बसदाशिवाय नमः पञ्चामृतस्नानं समर्पयामि ।

शुद्धोदकस्नान—ॐ शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनाः श्येतः श्येताक्षोऽरुणस्ते रुद्राय पशुपतये कर्णा यामा अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः ॥

श्रीभगवते साम्बसदाशिवाय नमः शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि ।

महाभिषेकस्नान—पार्थिव लिङ्ग पर 'नमस्ते०' (१-१६) इस रुद्रसूक्तसे अथवा 'महिम्नस्तोत्र' से जल की धारा द्वारा अभिषेक करे ।

गन्धोदकस्नान—ॐ त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः ।
त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत ॥

श्रीभगवते साम्बसदाशिवाय नमः गन्धोदकस्नानं समर्पयामि। गन्धोदकस्नानान्ते शुद्धोदकस्नानं समर्पयामि।

विजयास्नान—ॐ विज्ज्यं धनुः कपर्द्दिनो विशल्यो बाणवाँ२ ऽउत।
अनेशन्नस्य या ऽइषव ऽआभुरस्य निषङ्गधिः॥

श्रीभगवते साम्बसदाशिवाय नमः विजयां समर्पयामि। विजयासमर्पणान्ते शुद्धोदकस्नानं समर्पयामि।

पश्चात् गोदुग्ध और गङ्गाजल के साथ ग्यारह दूर्वाङ्कुरों से अथवा ग्यारह कुशाग्र-भागों से देवतीर्थ के द्वारा 'भव' आदि आठ देवताओं का इस प्रकार तर्पण करे—

ॐ भवाय नमः भवं देवं तर्पयामि॥ १॥ ॐ शर्वाय नमः शर्वं देवं तर्पयामि॥ २॥
ॐ ईशानाय नमः ईशानं देवं तर्पयामि॥ ३॥ ॐ पशुपतये नमः पशुपतिं देवं तर्पयामि॥४॥
ॐ उग्राय नमः उग्रं देवं तर्पयामि॥ ५॥ ॐ रुद्राय नमः रुद्रं देवं तर्पयामि॥ ६॥
ॐ भीमाय नमः भीमं देवं तर्पयामि॥ ७॥ ॐ महते नमः महान्तं देवं तर्पयामि॥ ८॥

इसके पश्चात् भव आदि आठ देवताओं की देवपत्नियों का इस प्रकार तर्पण करे—

ॐ भवस्य देवस्य पत्नीं तर्पयामि॥ १॥ ॐ शर्वस्य देवस्य पत्नीं तर्पयामि॥ २॥ ॐ ईशानस्य देवस्य पत्नीं तर्पयामि॥ ३॥ ॐ पशुपतेर्देवस्य पत्नीं तर्पयामि॥ ४॥ ॐ उग्रस्य

देवस्य पत्नीं तर्पयामि ॥ ५ ॥ ॐ रुद्रस्य देवस्य पत्नीं तर्पयामि ॥ ६ ॥ ॐ भीमस्य देवस्य पत्नीं तर्पयामि ॥ ७ ॥ ॐ महतो देवस्य पत्नीं तर्पयामि ॥ ८ ॥

सुगन्धितद्रव्यम्—ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥
त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् ।
उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥

श्रीभगवते साम्बसदाशिवाय नमः सुगन्धिद्रव्यं समर्पयामि ।

अङ्गपूजा

पार्थिव लिङ्ग का गन्ध, अक्षत और पुष्प आदि से इस प्रकार अङ्गपूजन करे—

ॐ ईशानाय नमः पादौ पूजयामि ॥ १ ॥ ॐ शङ्कराय नमः जङ्घे पूजयामि ॥ २ ॥
ॐ शूलपाणये नमः गुल्फौ पूजयामि ॥ ३ ॥ ॐ शम्भवे नमः कटी पूजयामि ॥ ४ ॥
ॐ स्वयम्भुवे नमः गुह्यं पूजयामि ॥ ५ ॥ ॐ महादेवाय नमः नाभिं पूजयामि ॥ ६ ॥
ॐ विश्वकर्त्रे नमः उदरं पूजयामि ॥ ७ ॥ ॐ सर्वतोमुखाय नमः पार्श्वे पूजयामि ॥ ८ ॥

ॐ स्थाणवे नमः स्तनौ पूजयामि ॥ ९ ॥ ॐ नीलकण्ठाय नमः कण्ठं पूजयामि ॥ १० ॥ ॐ शिवात्मने नमः मुखं पूजयामि ॥ ११ ॥ ॐ त्रिनेत्राय नमः नेत्रे पूजयामि ॥ १२ ॥ ॐ नागभूषणाय नमः शिरः पूजयामि ॥१३॥ ॐ देवाधिदेवाय नमः सर्वाङ्गं पूजयामि ॥१४॥

अष्टमूर्तिपूजा

ॐ भवाय क्षितिमूर्तये नमः ॥ १ ॥ ॐ शर्वाय जलमूर्तये नमः ॥ २ ॥ ॐ रुद्राय अग्निमूर्तये नमः ॥ ३ ॥ ॐ उग्राय वायुमूर्तये नमः ॥ ४ ॥ ॐ भीमाय आकाशमूर्तये नमः ॥५॥ ॐ पशुपतये यजमानमूर्तये नमः ॥६॥ ॐ महादेवाय सोममूर्तये नमः ॥७॥ ॐ ईशानाय सूर्यमूर्तये नमः ॥८॥

एकादश रुद्रपूजा

ॐ अघोराय नमः ॥१॥ ॐ पशुपतये नमः ॥ २ ॥ ॐ शर्वाय नमः ॥ ३ ॥ ॐ विरूपाक्षाय नमः ॥ ४ ॥ ॐ विश्वरूपिणे नमः ॥ ५ ॥ ॐ त्र्यम्बकाय नमः ॥ ६ ॥ ॐ कपर्दिने नमः ॥ ७ ॥ ॐ भैरवाय नमः ॥ ८ ॥ ॐ शूलपाणये नमः ॥ ९ ॥ ॐ ईशानाय नमः ॥ १० ॥ ॐ महेशाय ॐ नमः ॥ ११ ॥

वस्त्र—ॐ असौ योऽवसर्प्पति नीलग्ग्रीवो व्विलोहितः ।
उतैनं गोपा ऽअदृश्श्रन्नदृश्श्रन्नुदहार्य्यः स दृष्टो मृडयाति नः ॥
श्रीभगवते साम्बसदाशिवाय नमः वस्त्रं समर्पयामि ।

उपवस्त्र—ॐ सुजातो ज्ज्योतिषा सह शर्म्म व्वरूथ मा सदत्स्वः ।
व्वासो ऽअग्ने व्विश्श्वरूपठ्ठं सं व्ययस्व व्विभावसो ॥
श्रीभगवते साम्बसदाशिवाय नमः उपवस्त्रं समर्पयामि ।

यज्ञोपवीत—ॐ नमोऽस्तु नीलग्ग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये ऽअस्य सत्त्वानोऽहन्तेब्भ्योऽकरं नमः ॥
श्रीभगवते साम्बसदाशिवाय नमः यज्ञोपवीतं समर्पयामि । यज्ञोपवीतान्ते आचमनीयं जलं समर्पयामि ।

गन्ध (चन्दन)—ॐ प्रमुञ्च धन्न्वनस्त्वमुभयो रार्त्न्योर्ज्ज्याम् ।
याश्श्च ते हस्त ऽइषवः परा ता भगवो व्वप ॥
श्रीभगवते साम्बसदाशिवाय नमः गन्धं समर्पयामि ।

भस्म—ॐ प्रसद्य भस्मना योनिमपश्श्च पृथिवीमग्ग्ने ।

सठं॰ सृज्ज्यमातृभिष्ट्वं ज्ज्योतिष्मान् पुनरासदः ॥

श्रीभगवते साम्बसदाशिवाय नमः भस्म समर्पयामि ।

अक्षत—ॐ अक्षन्नमीमदन्त ह्यव प्प्रिया ऽअधूषत ।

अस्तोषत स्वभानवो व्विप्प्रा नविष्ठया मती योजान्विन्द्र ते हरी ॥

श्रीभगवते साम्बसदाशिवाय नमः अक्षतान् समर्पयामि ।

पुष्पमाला—ॐ व्विज्ज्यं धनुः कपर्दिनो व्विशल्ल्यो बाणवाँ२॥ ऽउत ।

अनेशन्नस्य या ऽइषव ऽआभुरस्य निषङ्गधिः ॥

श्रीभगवते साम्बसदाशिवाय नमः पुष्पमालां समर्पयामि ।

बिल्वपत्र—ॐ नमो ब्बिल्मिने च कवचिने च नमो व्वर्म्मिणे च व्वरूथिने च नमः श्श्रुताय च श्श्रुसेनाय च नमो दुन्दुब्भ्याय चाहनन्न्याय च ॥

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुतम् ।
त्रिजन्मपापसंहारं बिल्वपत्रं शिवार्पणम् ॥ १ ॥
दर्शनं बिल्वपत्रस्य स्पर्शनं पापनाशनम् ।
अघोरपापसङ्काशं बिल्वपत्रं शिवार्पणम् ॥ २ ॥

अखण्डैर्बिल्वपत्रैश्च पूजयेच्छिवशङ्करम् ।
कोटिकन्यामहादानं बिल्वपत्रं शिवार्पणम् ॥ ३ ॥

श्रीभगवते साम्बसदाशिवाय नमः एकादश बिल्वपत्राणि समर्पयामि ।

दूर्वा—ॐ काण्डात् काण्डात्प्ररोहन्ती परुषः परुषस्परि ।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥

श्रीभगवते साम्बसदाशिवाय नमः एकादश दूर्वाङ्कुरान् समर्पयामि ।

शमी—ॐ अग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामि बृहद्ग्रावासि वानस्पत्यः स इदं देवेभ्यो हविः शमीष्व सुशमि शमीष्व । हविष्कृदेहि हविष्कृदेहि ॥

श्रीभगवते साम्बसदाशिवाय नमः शमीपत्राणि समर्पयामि ।

तुलसी-मञ्जरी—ॐ शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः ।
मा द्यावापृथिवी ऽअभिशोचीर्मान्तरिक्षं मा वनस्पतीन् ॥

श्रीभगवते साम्बसदाशिवाय नमः तुलसीमञ्जरीं समर्पयामि ।

आभूषण—ॐ युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तन्तमिद्धतं वज्रेण तन्तमिद्धतम् । दूरे चत्ताय छन्त्सद् गहनं यदिनक्षत् ॥

श्रीभगवते साम्बसदाशिवाय नमः आभूषणं समर्पयामि ।

नानापरिमलद्रव्य—ॐ अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमांसं परि पातु विश्वतः ॥

श्रीभगवते साम्बसदाशिवाय नमः नानापरिमलद्रव्याणि समर्पयामि ।

सिन्दूर—ॐ सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ।
घृतस्य धारा ऽअरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥

श्रीभगवते साम्बसदाशिवाय नमः सिन्दूरं समर्पयामि ।

धूप—ॐ या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।
तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥

श्रीभगवते साम्बसदाशिवाय नमः धूपमाघ्रापयामि ।

दीप—ॐ परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः ।
अथो य ऽइषुधिस्तवारे ऽअस्मन्निधेहि तम् ॥

श्रीभगवते साम्बसदाशिवाय नमः एकादशवर्तिक्तदीपं दर्शयामि । हस्तप्रक्षालनम् ।

नैवेद्य—ॐ अवतत्त्य धनुष्ट्वᳬठ० सहस्राक्ष शतेषुधे।
निशीर्य्य शल्ल्यानां मुखा शिवो नः सुमना भव॥

श्रीभगवते साम्बसदाशिवाय नमः नैवेद्यं निवेदयामि। नैवेद्यान्ते आचमनीयं जलं समर्पयामि।

पश्चात् नैवेद्यको पवित्र जल से अभ्युक्षण करके गन्ध और पुष्पसे आच्छादित कर दे। अनन्तर धेनुमुद्रासे अमृतीकरण करके योनिमुद्रा दिखावे और घण्टा बजावे। पश्चात् ग्रासमुद्राको दिखलाकर—

ॐ प्राणाय स्वाहा। ॐ अपानाय स्वाहा। ॐ व्यानाय स्वाहा। ॐ समानाय स्वाहा। ॐ उदानाय स्वाहा॥

—इत्यादि के द्वारा मुद्राओं का प्रदर्शन करे और बीच-बीच में आचमनीय जलको समर्पित करे। उत्तरापोशनार्थ पुनः नैवेद्य निवेदन करे। हस्तप्रक्षालनार्थ और मुखप्रक्षालनार्थ जल समर्पित करे। पुनः आचमनीय जलको समर्पित करे।

ऋतुफल—ॐ याः फलिनीर्या ऽअफला ऽअपुष्पा याश्च पुष्पिणीः।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वᳬहसः॥

श्रीभगवते साम्बसदाशिवाय नमः एकादश ऋतुफलानि समर्पयामि।

धत्तूरफल—ॐ कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि ।
समापो अद्भिरग्मत समोषधीभिरोषधीः ॥
श्रीभगवते साम्बसदाशिवाय नमः एकादश धत्तूरफलानि समर्पयामि ।

ताम्बूल (सुपारी, इलायची और लवङ्ग के सहित)—
ॐ नमस्त आयुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥
श्रीभगवते साम्बसदाशिवाय नमः [1]मुखवासार्थे ताम्बूलं समर्पयामि ।

दक्षिणा—ॐ मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥
श्रीभगवते साम्बसदाशिवाय नमः दक्षिणां समर्पयामि ।

आरार्तिक्य—ॐ ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥ १ ॥

---

१. श्वेतपत्रं च चूर्णं च क्रमुकाणां फलानि च । नारिकेलफलोपेतं मातुलुङ्गसमायुतम् ॥
एला-लवङ्ग-कङ्कोलैर्मुखवासं प्रचक्षते ॥

ॐ इदर्ठ० हविः प्रजननं मे ऽ अस्तु दशवीरर्ठ० सर्व्वगणर्ठ० स्वस्तये ।
आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि ।
अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो ऽअस्मासु धत्त ॥ २ ॥
ॐ आ रात्रि पार्थिवर्ठ० रजः पितुरप्रायि धामभिः ।
दिवः सदार्थ्सि बृहती व्वितिष्ठस ऽआ त्वेषं व्वर्त्तते तमः ॥ ३ ॥

ॐ अग्निर्देवता व्वातो देवता सूर्य्यो देवता चन्द्रमा देवता व्वसवो देवता रुद्रा देवताऽऽदित्या देवता मरुतो देवता व्विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता व्वरुणो देवता ॥ ४ ॥

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदावसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥ ५ ॥

ॐ-जय शिव ओंकारा, भज शिव ओंकारा। ब्रह्मा विष्णु सदाशिव अर्द्धङ्गी धारा ॥ १ ॥
ॐ हर हर हर महादेव ॥
एकानन चतुरानन पञ्चानन राजै। हंसानन गरुडासन वृषवाहन साजै ॥ २ ॥
ॐ हर हर हर महादेव ॥

दो भुज चार चतुर्भुज दशभुज अति सोहैं । तीनों रूप निरखते त्रिभुवन-जन मोहैं ॥ ३ ॥
ॐ हर हर हर महादेव ॥

अक्षमाला बनमाला रुण्डमाला-धारी । चन्दन मृगमद सोहै भाले शशिधारी ॥ ४ ॥
ॐ हर हर हर महादेव ॥

श्वेताम्बर पीताम्बर बाघम्बर अंगे । ब्रह्मादिक गरुडादिक भूतादिक संगे ॥ ५ ॥
ॐ हर हर हर महादेव ॥

कर-मध्ये सुकमण्डलु चक्र त्रिशूल धरता । जगकर्ता जगहर्ता जगपालन करता ॥ ६ ॥
ॐ हर हर हर महादेव ॥

ब्रह्मा विष्णु सदाशिव जानत अविवेका । प्रणवाक्षरमें शोभित ये तीनों एका ॥ ७ ॥
ॐ हर हर हर महादेव ॥

काशी में विश्वनाथ विराजत नन्दी ब्रह्मचारी । नित उठ दर्शन पावै महिमा अति भारी ॥ ८ ॥
ॐ हर हर हर महादेव ॥

त्रिगुण स्वामिकी आरति जो कोई नर गावै । भनत शिवानन्द स्वामी मनवाञ्छित फल पावै ॥ ९ ॥
ॐ हर हर हर महादेव ॥

जय शिव ओंकारा, हो मन भज शिव ओंकारा ।
हो मन रट शिव ओंकारा, हो शिव गल रुण्डमाला ।

हो शिव ओढ़त मृगछाला, हो शिव पीते भंग-प्याला ॥
हो शिव रहते मतवाला, हो शिव पार्वती प्यारा ।
हो शिव ऊपर जलधारा, ब्रह्मा विष्णु सदाशिव अर्द्धङ्गी धारा ॥ १० ॥

ॐ हर हर हर महादेव ॥

मन्त्रपुष्पाञ्जलि—ॐ मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः ।
मा नो व्वीरान् रुद्र भामिनो व्वधीर्हविष्म्मन्तः सदमित्त्वा हवामहे ॥
ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्व्वे साध्याः सन्ति देवाः ॥

(शु० य० ३१।१६)

ॐ राजाधिराजाय प्रसह्य साहिने । नमो वयं वैश्रवणाय कुर्महे । स मे कामान् कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय महाराजाय नमः ।

(तैत्तिरीयारण्यक १।३१)

ॐ स्वस्ति । साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं

समन्तपर्यायी स्यात्, सार्वभौमः सार्वायुष आन्तादापरार्धात्, पृथिव्यै समुद्रपर्यन्ताया एकराडिति॥
(ऐतरेयब्राह्मण ८।४।१५)

तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे ।
आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ॥
(ऐतरेयब्राह्मण ८।४।२१)

ॐ विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात् ।
सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन्देव एकः ॥
(शु० य० १७।१९)

शिवगायत्री—ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

मन्दारमालाकुलितालकायै कपालमालाङ्कितशेखराय ।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय ॥

इस प्रकार मन्त्र-पुष्पाञ्जलि कर 'भव' आदि आठ देवताओं को और उनकी पत्नियों को नमस्कार कर उनकी पञ्चोपचार आदि से पूजा करे । पश्चात् "ॐनमः शिवाय" इस मन्त्रका १०८ बार जप करे । अनन्तर निम्नलिखित शिव के ११ नाम—मन्त्रों से ११ बार अलग-अलग पुष्पाञ्जलि अर्पित करे—

ॐ रुद्राय नमः ॥ १ ॥ ॐ पशुपतये नमः ॥ २ ॥ ॐ नीलकण्ठाय नमः ॥ ३ ॥ ॐ महेश्वराय नमः ॥ ४ ॥ ॐ हरिकेशाय नमः ॥ ५ ॥ ॐ विरूपाक्षाय नमः ॥ ६ ॥ ॐ पिनाकिने नमः ॥ ७ ॥ ॐ त्रिपुरान्तकाय नमः ॥ ८ ॥ ॐ शम्भवे नमः ॥ ९ ॥ ॐ शूलिने नमः ॥ १० ॥ ॐ महादेवाय नमः ॥ ११ ॥

प्रदक्षिणा—ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।
तेषाᳬं सहस्रयोजनेऽव धन्वानि तन्मसि ॥
ॐ सप्तास्यासन् परिधयस्त्रिः सप्तसमिधः कृताः ।
देवा यद्यज्ञं तन्वाना ऽअबध्नन् पुरुषं पशुम् ॥

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि प्रणश्यन्ति प्रदक्षिणपदे पदे ॥

प्रणाम—ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्य-शशाङ्क-वह्निनयनं वन्दे मुकुन्दप्रियं वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करम् ॥ १ ॥
वन्दे महेशं सुरसिद्धसेवितं भक्तैः सदा पूजितपादपद्मम् ।
ब्रह्मेन्द्रविष्णुप्रमुखैश्च वन्दितं ध्यायेत्सदा कामदुघं प्रसन्नम् ॥ २ ॥

इस प्रकार प्रणाम करने के बाद 'महिम्नस्तोत्र' आदि शिवसम्बधी स्तोत्रों का पाठ कर शिवजी की स्तुति करे।

क्षमा-प्रार्थना—मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर । यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ १ ॥
आवाहनं न जानामि न जानामि तवार्चनम् । पूजां चैव न जानामि क्षमस्व परमेश्वर ॥ २ ॥
पापोऽहं पापकर्माऽहं पापात्मा पापसम्भवः । त्राहि मां पार्वतीनाथ सर्वपापहरो भव ॥ ३ ॥
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया । दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर ॥ ४ ॥
त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्यां द्रविणं त्वमेव, त्वमेव सर्वं मम देव देव ॥ ५ ॥

पश्चात् आवाहित किये गये पार्थिव-लिङ्ग का विसर्जन करे ।

ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।
उप प्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ॥

गच्छ गच्छ महादेव स्वस्थाने च पिनाकधृक्। यत्रास्ति पार्वती देवी तत्र गच्छ महेश्वर ॥ १ ॥
ईशानः सर्वविद्यानामोङ्कारभुवनेश्वरम्। मन्दिरं गच्छ देवेश पुनरायाहि शङ्कर ॥ २ ॥
हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक्। शिवः पशुपतिश्चैव महादेव विसर्जनम् ॥ ३ ॥

पश्चात् निम्नाङ्कित वाक्य कहकर यह पूजन-कर्म भगवान् को समर्पित करे।

अनेन यथाशक्तिकृतेन पार्थिवलिङ्गपूजनेन भगवान् श्रीसाम्बसदाशिवः प्रीयतां न मम।

ॐ विष्णवे नमः। ॐ विष्णवे नमः। ॐ विष्णवे नमः।

इति पार्थिवपूजनविधिः।



ऋग्वेदोक्तं श्रीसूक्तम्

(हिन्दी-मन्त्रार्थ सहितम्)

हिन्दी मन्त्रार्थ कर्ता—

पं० वेणीराम शर्मा गौड

लक्ष्मी की प्राप्ति के लिये 'श्रीसूक्त' को बहुत ही महत्त्वपूर्ण और लाभप्रद कहा गया है। इसके नियमपूर्वक पाठ, जप और हवन करने से प्रचुर लक्ष्मी की प्राप्ति होती है। अतः जनता-जनार्दन के लाभार्थ श्रीसूक्त का हिन्दी में अर्थ प्रकाशित किया गया है, जिससे सभी लोग श्रीसूक्त के अर्थ को समझ कर विशेष लाभान्वित हो सकते हैं। इस पुस्तक के प्रारम्भ में वेदाचार्य पण्डित वेणीरामजी गौड ने महालक्ष्मी के न्यास, ध्यान और पूजन की विधि तथा रुद्रयामल और सप्तशतीसर्वस्व में लिखित दो प्रकार के श्रीसूक्त की सम्पुटित पुरश्चरण विधि भी दे दी है। साथ ही लक्ष्मी की विशेष प्राप्ति के लिये कुछ महत्त्वपूर्ण वेदमन्त्रों और तान्त्रिक मन्त्रों को भी दिया गया है। पुस्तक के अन्त में वेदोक्त लक्ष्मीसूक्त और पुराणोक्त श्रीसूक्त तथा दो प्रकार के धनदास्तोत्र और एक प्रकार का धनदाकवच दे दिया है, जिनके पाठमात्र करने से निश्चित ही लक्ष्मी की प्राप्ति और वृद्धि होती है। सर्वश्रेष्ठ श्रीसूक्त का लागत मात्र

१-५०

